उपशास्त्री

Date 25.08.20
Page 2

अथात्र मारकक्रमे निर्णयमाह —

तद्धीशितुस्तत्र गताः पापिनस्तेन संयुताः ॥
तेषां दशाविपाकेषु संभवे निधनं नृणाम् ॥
तेषामसंभवे साक्षाद्व्ययाधीशदशास्वपि ॥

अन्वयः — तद् ईशितु तथा तेन संयुताः तत्र गताः ये पापिनः तेषां च सम्भवे दशाविपाकेषु नृणां निधनं वाच्यं तेषाम् असम्भवे सति व्ययाधीशदशासु अपि नृणां मरणं वाच्यं तेषाम् असम्भवे सति व्ययाधीशदशासु अपि नृणां मरणं वाच्यं।

संस्कृत — ग्रन्थान्तराद्यायुषो निश्चयं कृत्वा तद्धीशितुर्मारकेशस्य दशाविपाकेषु दशान्तर्दशादिरूपसमयेषु तत्र गताः मारकस्थानगता ये पापिनस्तेषां दशान्तर्दशादिषु वा तेन मारकेशेन संयुता ये पापिनो ग्रहास्तेषां दशान्तर्दशादिषु संभवे आयुषः समाप्तौ निधनं नृणां स्यादिति। तेषां मारकमारकस्थानगतमारकेशयुतानां दशादिसमयानामसंभवेऽप्राप्तौ साक्षाद्व्ययाधीशस्य लग्नात् द्वादशाधीशस्य दशासु निधनं स्यादिति।

क्षेमङ्करी — मारकेश ग्रह की दशादि समय में मारक स्थान में अथवा मारकेश ग्रह के साथ जो पापी ग्रह त्रिषडायेश हो उनकी दशान्तर्दशादि में यदि आयुर्दाय का अन्त होता हो, तो निधन कहना चाहिए यदि आयुः खण्ड के समाप्ति समय में इन ग्रहों की दशादि समय की प्राप्ति न हो, तो लग्न से जो व्ययेश उसके दशान्तर्दशादि रूप समय में मरण कहना चाहिए।

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुरवसेना,
पूर्णियाँ।

# अथायुर्दायाध्यायः

## उपशास्त्री

Date 25.08.20
Page 1

अथाद्यावायुः स्थानकथनपूर्वकं मारकस्थानमाह —

अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् ।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते ॥

अन्वयः – अष्टमं यत् च अष्टमात् अष्टमं तत् आयुषः स्थानम् उच्यते । अपि च तयोः व्ययस्थानं मारकस्थानम् उच्यते ।

संस्कृत – अष्टमं हि आयुषः स्थानमष्टमाद्यदष्टमं तदपि आयुषः स्थानं तयोरपि व्ययस्थानं सप्तमं द्वितीयं च मारकस्थान-मुच्यत इत्यन्वयः भाग्यव्ययत्वादष्टमं मुख्यमायुषः स्थानम् । ततो यदष्टममर्थात्तृतीयं बलसाहसादि कारकत्वात्तदप्यायुषः स्थानम् । तयोः व्ययस्थानं स्त्रीधनकारणत्वान्मारक स्थानं तन्निश्चयेनेति ।

क्षेमङ्करी – जन्मलग्न से अष्टम भाव और उस अष्टम भाव से अष्टम भाव अर्थात् लग्न से तृतीय भाव, आयुः स्थान कहलाते हैं । और इनके जो द्वादश अर्थात् सप्तम और द्वितीय ये मारक स्थान कहे जाते हैं ।

विमर्श – लग्न से अष्टम आयुः स्थान है क्योंकि अष्टमेश ही सर्वाधिक पापी माना गया है । अतः कुण्डली में सर्वाधिक शुभ भाव नवम भाव (भाग्यस्थान) का व्ययभाव होने से अष्टम भाव का परम अशुभ होना समीचीन ही है । इसी तरह अष्टम से अष्टम भाव (लग्न से) तृतीय स्थान भी आयु स्थान होगा । इन दोनों स्थानों के व्यय भाव क्रमशः सप्तम व द्वितीय होते हैं । वस्तुतः ये दोनों मारक स्थान हैं, जैसे आयुस्थान प्रधान और गौण दो हैं । उसी प्रकार मारक स्थानों में भी प्रधान (सप्तमभाव) और गौण (द्वितीय भाव) मारक स्थान कहा गया है ।

डॉ० सुधिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना
पूर्णियाँ ।

(14) कियन्ति ज्ञानेन्द्रियाणि?
उत्तरम् - पञ्च।
(15) सूक्ष्मतमजीवात्मा कस्य हृदयेऽस्ति?
उत्तरम् - परमात्मनः।
(16) परमात्मा कुत्र निवसति?
उत्तरम् - सर्वभूतानां हृदये।
(17) स्त्रियां किमुत्पन्नो भवति?
उत्तरम् - स्वयमात्मा।
(18) मनसा सह को गच्छति?
उत्तरम् - आत्मा।
(19) 'यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा' कुतः समागता सूक्तिरियम्?
उत्तरम् - वायवीयसंहितातः।
(20) 'योऽयं विचिन्तयति याति स तन्मयत्वम्' इयं सूक्तिः कस्मिन् ग्रन्थे?
उत्तरम् - बृहत्संहितायाम्।
(21) स्त्रीणां प्रतिकूलाचरणे जायते -
उत्तरम् - विद्वेषः।
(22) किं परित्यक्त्वा मनुष्यः सर्वप्रियो जायते?
उत्तरम् - गर्वम्।
(23) कः पुरुषः विलम्बेन कार्यसिद्धं करोति?
उत्तरम् - अभिमानी।
(24) सज्जनः कथं कार्यं साधयति?
उत्तरम् - मधुरभाषणेन।
(25) कस्तेजवान् भवति?
उत्तरम् - निरभिमानी।

डॉ० सुधिष्ठिर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं०मउ्यावि० सुखसेना,
पूर्णियाँ।

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

25.08.20
3

(1) स्त्रीभ्य तैः गुणाः दत्ताः—
उत्तरम् – सोमेन शौचम्।
(2) पादतः के मेध्याः?
उत्तरम्- विप्राः।
(3) पृष्ठतः के मेध्याः?
उत्तरम्- गावः।
(4) मुखतः के पूताः?
उत्तरम्- अश्वाः।
(5) सर्वतः के मेध्याः?
उत्तरम्- स्त्रियः।
(6) मासिकं रजः स्त्रीणां किमपस्यारयति?
उत्तरम्- दुष्कृतात्।
(7) कानि गृहाणि नश्यन्ति?
उत्तरम्- यानि स्त्रियः शपन्ति।
(8) कदा शपन्ति कुलस्त्रियः?
उत्तरम्- अपमानिताः।
(9) मनुष्याणां समुत्पत्तिः कुतः?
उत्तरम्- स्त्रीतः।
(10) दम्पत्योर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः।
नरा न तमवेक्षन्ते तेनाऽत्र वरमङ्गनाः॥
इति कस्य वचनम्?
उत्तरम्- मनोः।
(11) परस्त्रीगामी कति मासान् भीक्षित्वा शुद्धयाते?
उत्तरम्- षण्मासान्।
(12) मदनाश्रय नैव गच्छति?
उत्तरम्- शतवर्षेणापि।
(13) राज्यस्य सारवस्तूनि कियन्ति?
उत्तरम्- द्वे।

P.T.O